*** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तानां पदानां सहायतया पञ्चवाक्यानि रचयत।** **[5]**

1.




**उत्तर :** अस्मिन् चित्रे -
(क) द्वौ गोपबन्धुः पीडितम् पुरुषं च स्तः।
(ख) गोपबन्धुः पीडितम् चिकित्सालयम् नयति।
(ग) सः सर्वदा पीडितानाम सहायकः भवति।
(घ) गोपबन्धुः निःस्वार्थ भावनया परिपूर्णः अस्ति।
(ङ) अतः सः उत्कलमणिः इति उपाधिना समादृतः।

*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[13]**

2. केचित् अस्वस्थाः कुत्र मृत्युना सह युध्यन्ते?
   (A) विद्यालये (B) क्षेत्रे (C) गृहे (D) चिकित्सालये

   **उत्तर :** (D) चिकित्सालये

3. के नदीस्रोतसा प्रवाहिताः मृताः च?
   (A) गृहपालिताः पक्षिणः (B) गृहपालिताः सेवकाः (C) गृहपालिताः पशवः (D) सर्वेऽपि

   **उत्तर :** (C) गृहपालिताः पशवः

4. केन वासगृहाणि नष्टानि अनाहारेण च कष्टं सहन्ते?
   (A) जलप्लावेन (B) भूस्खलेन (C) पर्वत स्खलेन (D) अतिदुःखेन

   **उत्तर:** (A) जलप्लावेन

5. छात्राः कस्य चित्रम् पश्यन्ति?
   (A) आचार्यः हरिहरस्य (B) शिक्षकस्य (C) प्रफुल्लचन्द्ररायस्य (D) गोपबन्धोः

   **उत्तर :** (D) गोपबन्धोः

6. वनविद्यालयस्य किम् नाम?
   (A) मिथ्यावादिः (B) छलमाश्रितः (C) सत्यवादि (D) दयानिधि

   **उत्तर :** (C) सत्यवादि

7. गोपबन्धुः कस्मिन् राज्ये जन्म लब्धवान्?

(A) बांग्लाराज्ये (B) पुरी राज्ये (C) ओडिशाराज्ये (D) साक्षी गोपाल राज्ये

**उत्तर :** (C) ओडिशाराज्ये

8. गोपबन्धुः भिक्षुकाय कस्य भोजनम् दत्तवान्?

(A) आचार्यः हरिहराय (B) स्वस्य (C) मातुः (D) अतिथीनाम्

**उत्तर :** (B) स्वस्य

9. व्यञ्जनानि कीदृशानि आसन्?

(A) कटुस्वादूनि (B) तिक्तस्वादूनि (C) सुस्वादूनि (D) सर्वेऽपि

**उत्तर :** (C) सुस्वादूनि

10. गोपबन्धुः कया उपाधिना सम्मानितवान्?

(A) भारतरत्नः (B) ओडिशारत्नः (C) पुरीमणिः (D) उत्कलमणिः

**उत्तर :** (D) उत्कलमणिः

11. गोपबन्धुः कस्य वार्तापत्रस्य प्रतिष्ठाता आसीत्?

(A) समाजः इति (B) देशः इति (C) राज्यः इति (D) संघः इति

**उत्तर:** (A) समाजः इति

12. अध्ययनकालादेव गोपबन्धुः केषाम् सेवाम् अकरोत्?

(A) धनीनाम् (B) अध्यापकानाम् (C) छात्राणाम् (D) दरिद्राणाम्

**उत्तर :** (D) दरिद्राणाम्

13. आचार्य हरिहरदासः कान् भोजनाय आमन्त्रितवान्?

(A) अध्यापकान् (B) सेवकान् (C) नागरिकान् (D) जलप्लाव-पीडितान्

**उत्तर:** (A) अध्यापकान्

14. गोपबन्धोः प्रसिद्धं प्रेरणादायकं वचनम् जनमानसेषु किम् जागरयति?

(A) मातृभक्तिम् (B) पितृभक्तिम् (C) राष्ट्रभक्तिम् (D) गुरुभक्तिम्

**उत्तर :** (C) राष्ट्रभक्तिम्

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[12]**

15. अस्माभिः एतादृशानाम् ____________ सहायता करणीया। (दुःखितानाम् / हसितानाम्)

**उत्तर :** दुःखितानाम्

16. 'आँ आँ' - इति ____________ क्रन्दनध्वनिम् अकरोत्। (दातारः / भिक्षुकः)

**उत्तर :** भिक्षुकः

17. गोपबन्धुदासः ____________ समाजसेवकः आसीत्। (हीनः / महान्)

**उत्तर :** महान्

18. गोपबन्धुः ____________ नयनोऽभवत्। (उपेक्षकः / अश्रूपूर्णः)

**उत्तर :** अश्रूपूर्णः

19. जलप्लावेन ____________ हानिः सञ्जाता। (अल्पः / महती)

**उत्तर :** महती

20. दौर्लभ्यम् भोजनम् जीवनाय __________ भवति। (सुखप्रदम् / दुःखप्रदम्)

**उत्तर :** सुखप्रदम्

21. सः सर्वदा __________ वस्त्रानाम् वस्तूनां च उपयोगं कृतवान्। (स्वदेशस्यैव / विदेशस्यैव)

**उत्तर :** स्वदेशस्यैव

22. कारागारे निवसन् गोपबन्धुः __________ पुस्तकानि विरचितवान्। (प्रेरणादायिनी / हतोत्साहिनी)

**उत्तर :** प्रेरणादायिनी

23. __________ दूरी करणाय गोपबन्धुः सततं यतते स्म। (साक्षरता / निरक्षरता)

**उत्तर :** निरक्षरता

24. __________ निर्माणाय सः स्वयमेव सूत्र प्रस्तुतिम् अकरोत्। (ऊर्णवस्त्राणि / कर्पासवस्त्राणि)

**उत्तर :** कर्पासवस्त्राणि

25. देशभक्तः गोपबन्धुः सर्वदा __________। (वन्दनीयः / निन्दनीयः)

**उत्तर :** वन्दनीयः

26. समाजसेवायै देशसेवायै च गोपबन्धुः असीमम् __________ अकरोत्। (त्यागम् / आसक्तिम्)

**उत्तर :** त्यागम्

*** स्तम्भयोः मेलनं कुरुत।** **[16]**

| शब्दाः | अर्थाः |
|---|---|
| 27. गर्तमालिका | (i) प्रतिदिनं प्रकाशित-पत्रस्य |
| 28. दैनिकवार्तापत्रस्य | (ii) गर्तानाम् श्रृंखला |
| 29. उत्कलमणिः | (iii) अस्थिभिः मांसैः च |
| 30. अस्थिमांसैः | (iv) उत्कलस्य मणिसदृशः |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. गर्तमालिका | (ii) गर्तानाम् श्रृंखला |
| 2. दैनिकवार्तापत्रस्य | (i) प्रतिदिनं प्रकाशित-पत्रस्य |
| 3. उत्कलमणिः | (iv) उत्कलस्य मणिसदृशः |
| 4. अस्थिमांसैः | (iii) अस्थिभिः मांसैः च |

| शब्दाः | अर्थाः |
|---|---|
| 31. लोक सेवकः | (i) अतुलनीयम् |
| 32. असीमम् | (ii) जनसेवकः |

| | |
|---|---|
| 33. कारावासम् | (iii) स्वतंत्रतासेनानी |
| 34. स्वतन्त्रता संग्रामी | (iv) कारागृहे बन्धनम् |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. लोक सेवकः | (ii) जनसेवकः |
| 2. असीमम् | (i) अतुलनीयम् |
| 3. कारावासम् | (iv) कारागृहे बन्धनम् |
| 4. स्वतन्त्रता संग्रामी | (iii) स्वतंत्रतासेनानी |

| शब्दाः | अर्थाः |
|---|---|
| 35. कारावासम् | (i) स्वतंत्रतासेनानी |
| 36. स्वतन्त्रता संग्रामी | (ii) कारागृहे बन्धनम् |
| 37. चिन्ताकुलः | (iii) सहस्राधिकाः |
| 38. सहस्रशः | (iv) चिन्तया व्याकुलः |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. कारावासम् | (ii) कारागृहे बन्धनम् |
| 2. स्वतन्त्रता संग्रामी | (i) स्वतंत्रतासेनानी |
| 3. चिन्ताकुलः | (vi) चिन्तया व्याकुलः |
| 4. सहस्रशः | (iii) सहस्राधिकाः |

| शब्दाः | अर्थाः |
|---|---|
| 39. समाजः | (i) गोपबन्धुः |
| 40. ममास्थिमांसैः | (ii) क्रन्दनध्वनिः |
| 41. उत्कलमणिः | (iii) दिनपत्रिका |
| 42. आँ आँ.. इति | (iv) परिपूरितास्तु |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. समाजः | (iii) दिनपत्रिका |
| 2. ममास्थिमांसैः | (iv) परिपूरितास्तु |

| | |
|---|---|
| 3. उत्कलमणिः | (i) गोपबन्धुः |
| 4. आँ आँ.. इति | (ii) क्रन्दनध्वनिः |

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[5]**

43. गोपबन्धुः कस्मै स्वभोजनं दत्तवान्?

**उत्तर :** बुभुक्षिताय

44. गोपबन्धुः केन उपाधिना सम्मानितः अभवत्?

**उत्तर :** उत्कलमणिः

45. मरणासन्नः कः आसीत्?

**उत्तर :** तस्यपुत्रः

46. समाज-दिनपत्रिकायाः प्रतिष्ठाता कः?

**उत्तर :** गोपबन्धुदासः

47. गोपबन्धुः कति वर्षाणि कारावासं प्राप्तवान्?

**उत्तर :** वर्षद्वयम्

*** पूर्णवाक्येन उत्तरं लिखत।** **[34]**

48. कीदृशं पुत्रं विहाय गोपबन्धुः समाजसेवाम् अकरोत्?

**उत्तर :** मरणासन्नम् पुत्रं विहाय गोपबन्धुः समाजसेवाम् अकरोत्।

49. गोपबन्धुः सर्वदा केषाम् उपयोगं कृतवान्?

**उत्तर :** गोपबन्धुः सर्वदा स्वदेशस्यैव वस्त्राणाम् वस्तूनां च उपयोगम् कृतवान्।

50. गोपबन्धोः कृते उत्कलमणिः इति उपाधिः किमर्थं प्रदत्तः?

**उत्तर :** समाजसेवायै देशसेवायै च तस्य असीमं त्यागमनुभवन् गोपबन्धोः 'उत्कलमणिः' इति उपाधिः प्रदत्तः।

51. गोपबन्धुः किमर्थम् अश्रुपूर्णनयनः अभवत् ?

**उत्तर :** बुभुक्षितस्य दुर्दशां दृष्ट्वा गोपबन्धुः अश्रुपूर्ण-नयनः अभवत् ।

52. गोपबन्धुः कुत्र जन्म लब्धवान्?

**उत्तर :** गोपबन्धुः ओडिशा राज्यस्य पुरी जनपदे सुआण्डोग्रामे जन्म लब्धवान्।

53. ओडिशा राज्ये जनाः कया आपदया पीडिताः आसन्?

**उत्तर :** ओडिशाराज्ये जनाः 'जलप्लावः' इति आपदया पीडिताः आसन्।

54. कारावासे सः कानि पुस्तकानि विरचितवान्?

**उत्तर :** कारावासे सः 'बन्दीर आत्मकथा', 'कारा-कविता', 'धर्मपद', 'गो-माहात्म्य', 'नचिकेता-उपाख्यान' आदिनि बहुप्रेरणादायिनी पुस्तकानि विरचितवान्।

55. कीदृशानि व्यञ्जनानि परिवेषितानि?

**उत्तर :** सर्वे अतिथयः बहूनि सुस्वादूनि व्यञ्जनानि कदलीपत्रेषु परिवेषितानि।

56. क्रन्दनध्वनिं श्रुत्वा गोपबन्धु किमर्थम् अश्रूपूर्ण नयनोऽभवत?

**उत्तर :** क्रन्दनध्वनिं श्रुत्वा गोपबन्धुः दयाविगलित हृदयः भूत्वा अश्रूपूर्ण नयनोऽभवत्।

57. गृहात् बहिः गोपबन्धुः किम् अशृणोत्?

**उत्तर :** गृहात् बहिः गोपबन्धुः कश्चन करुणध्वनिम् अशृणोत्।

58. गोपबन्धुः कस्य विद्यालयस्य अध्यापकः आसीत्?

**उत्तर :** गोपबन्धुः सत्यवादि-वन विद्यालयस्य अध्यापकः आसीत्।

59. गोपबन्धुः कारावासं किमर्थं प्राप्तवान्?

**उत्तर :** गोपबन्धुः कारावासम् प्राप्तवान् यतः सः महात्मागान्धेः प्रेरणया भारतीय स्वतन्त्रता आन्दोलने भागं गृहीतवान्।

60. गोपबन्धुः पीडितेभ्यः किम् अकरोत् किमर्थम् च?

**उत्तर :** गोपबन्धुः पीडितेभ्यः अकुण्ठं सेवां कृत्वा आत्मसन्तुष्टिं प्राप्तवान्। यतः सः सदैव तेषाम् सेवार्थम् तत्पर अभवत्। पीडितानाम् दृष्ट्वा सः विगलितहृदयः अभवत्।

61. जन्मभूमः दुर्दशां अवलोक्य सः किम् अकरोत्?

**उत्तर :** जन्मभूमेः दुर्दशायां अवलोक्य सः सर्वदा चिन्ताकुलो भवति तथा पीडितानां सेवां अकरोत्।

62. प्रफुल्लचन्द्ररायः किमर्थं गोपबन्धुम् 'उत्कलमणिः' इति उपाधिना सम्मानितवान्?

**उत्तर :** प्रफुल्लचन्द्ररायः गोपबन्धोः समाजसेवायै देशसेवायै च असीमम् त्यागं अनुभवन् 'उत्कलमणिः' इति उपाधिना सम्मानितवान्।

63. सर्वे अध्यापकाः आचार्यहरिहरदासस्य गृहे किमर्थं गतवन्तः?

**उत्तर :** सर्वे अध्यापकाः आचार्य हरिहरदासस्य गृहे भोजनाय गतवन्तः यतः आचार्य तान् अध्यापकन् आमन्त्रितवान्।

64. जनाः कीदृशानि कष्टानि असहन्?

**उत्तर :** जनानाम् वासगृहाणि नष्टानि। केचित् अस्वस्थाः चिकित्सालये मृत्युना सह अयुध्यन्। अन्ये च अनाहारेण कष्टं असहन्। बहवः गृहपालिताः पशवः नदीस्रोतसा प्रवाहिताः मृताश्च। ते अतिदुखिताः अभवन्।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[12]**

65. केन्द्रपडाजनपदे महानद्यां <u>भयंकरः</u> जलप्लावः संभूतः।

**उत्तर :** केन्द्रपडाजनपदे महानद्यां **कीदृशः** जलप्लावः संभूतः?

66. अस्माभिः एतादृशानां दुःखितानाम् <u>सहायता</u> करणीया।

**उत्तर :** अस्माभिः एतादृशानां दुःखितानाम् **किम्** करणीया?

67. अस्वस्थाः चिकित्सालये <u>मृत्युना</u> सह युध्यन्ते।

**उत्तर :** अस्वस्थाः चिकित्सालये **केन** सह युध्यन्ते?

68. आमन्त्रिताः सर्वे अतिथयः <u>हस्तपादं क्षालयित्वा</u> आसनेषु उपविष्टवन्तः।

**उत्तर :** आमन्त्रिताः सर्वे अतिथयः **किम् कृत्वा** आसनेषु उपविष्टवन्तः?

69. गोपबन्धुः किमपि अविचित्य झटिति <u>स्वस्मै</u> परिवेषितम् भोजनम् बुभुक्षितम् भोजितवान्।

**उत्तर :** गोपबन्धुः किमपि अविचिन्त्य झटिति कस्मै परिवेषितम् भोजनम् बुभुक्षितम् भोजितवान्?

70. दिनत्रयात् बुभु<u>क्षितः</u> किमपि न भुक्तवान।

**उत्तर :** दिनत्रयात् **कः** किमपि न भुक्तवान्?

71. सर्वे छात्राः <u>गोपबन्धोः</u> चित्रम् पश्यन्ति।

**उत्तर :** सर्वे छात्राः **कस्य** चित्रम् पश्यन्ति?

72. <u>जीवनाय सुखप्रदम्</u> भोजनम् अति-दौर्लभ्यं भवति।

**उत्तर : कीदृशम्** भोजनम् अति-दौर्लभ्यं भवति?

73. कारागारे निवसन् गोपबन्धुः <u>ओडिआ</u> भाषया पुस्तकानि विरचितवान्।

**उत्तर :** कारागारे निवसन् गोपबन्धुः **कया** भाषया पुस्तकानि विरचितवान्?

74. <u>सत्यवादि वन विद्यालये</u> सः छात्रान् निःशुल्कम् अपाठयत्।

**उत्तर : कुत्र** सः छात्रान् निःशुल्कम अपाठयत्?

75. <u>मरणासन्नं स्वपुत्रमपि</u> विहाय गोपबन्धुः जलप्लाव पीडितान् उद्धर्तुम् गृहात् बहिः निर्गतः।

**उत्तर : कम्** विहाय गोपबन्धुः जलप्लाव पीडितान् उद्धर्तुम् गृहात् बहिः निर्गतः?

76. अध्ययनकालादेव गोपबन्धुः <u>दरिद्राणाम् रोगिणाम्</u> च सेवाम अकरोत्।

**उत्तर :** अध्ययनकालादेव गोपबन्धुः **केषाम्** सेवाम् अकरोत्?

*** अधोलिखितानि क्रम रहित वाक्यानि घटना क्रमानुसारं संयोजनयत।** **[9]**

77. (i) उत्कलमणिः गोपबन्धुः जलप्लावपीडितानाम् अकुण्ठं सेवां अकरोत्।
(ii) एकदा आचार्य हरिहरदासः सत्यवादि-वनविद्यालयस्य सर्वान् अध्यापकान् भोजनाय आमन्त्रितवान्।
(iii) महात्मा गाँधे: प्रेरणयासः भारतीय-स्वतन्त्रता आन्दोलने भागं गृहीतवान्।
(iv) ओडिशाराज्यस्य केन्द्रपडा-जनपदे महानद्यां भयङ्करः जलप्लावः सम्भूतः।
(v) जलप्लावपीडिताः अनेकानि कष्टानि असहन्।
(vi) सेवातत्परः गोपबन्धुः दरिद्राणाम् रोगिणाम् च सेवाम् अकरोत्।

**उत्तर :** (iv) ओडिशाराज्यस्य केन्द्रपडा-जनपदे महानद्यां भयङ्करः जलप्लावः सम्भूतः।
(v) जलप्लावपीडिताः अनेकानि कष्टानि असहन्।
(i) उत्कलमणिः गोपबन्धुः जलप्लावपीडितानाम् अकुण्ठं सेवां अकरोत्।
(ii) एकदा आचार्य हरिहरदासः सत्यवादि-वनविद्यालयस्य सर्वान् अध्यापकान् भोजनाय आमन्त्रितवान्।
(vi) सेवातत्परः गोपबन्धुः दरिद्राणाम् रोगिणाम् च सेवाम् अकरोत्।
(iii) महात्मा गाँधीः प्रेरणया सः भारतीय-स्वतन्त्रता आन्दोलने भागं गृहीतवान्।

78. (क) भिक्षुकञ्च तद्भोजितवान्।
(ख) प्रफुल्लचन्द्ररायः गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।
(ग) गोपबन्धुः अश्रूपूर्णनयनोऽभवत्।
(घ) गोपबन्धुः स्वजीवनं देशसेवायै समर्पितवान्।
(ड) दिनत्रयात् किमपि न भुक्तम्।
(च) अतिथयो हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः।

**उत्तर :** (च)अतिथयो हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः।
(ड) दिनत्रयात् किमपि न भुक्तम्।
(ग) गोपबन्धुः अश्रूपूर्णनयनोऽभवत्।
(क) भिक्षुकञ्च तद्वर्जितवान्।
(ख) प्रफुल्लचन्द्ररायः गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।
(घ) गोपबन्धुः स्वजीवनं देशसेवायै समर्पितवान्।

79. (i) सः सर्वदा स्वदेशस्यैव वस्त्राणां वस्तूनां च उपयोगं कृतवान्।

(ii) सेवातत्परः गोपबन्धुः दरिद्राणाम् रोगिणाम् च सेवाम् अकरोत्।

(iii) महात्मा गाँधेः प्रेरणयासः भारतीय स्वतन्त्रता आन्दोलने भागं गृहीतवान्।

(iv) गोपबन्धुः 'समाजः' इति दैनिकपत्रस्य प्रतिष्ठाता अपि आसीत्।

(v) कारागारे निवसन् सः बहुप्रेरणादायिनी पुस्तकानि विरचितवान्।

(vi) मरणासन्नं स्वपुत्रं अपि विहाय जलपीडितानाम् सेवार्थम् अगच्छत्।

**उत्तर :** (ii) सेवातत्परः गोपबन्धुः दरिद्राणाम् रोगिणाम् च सेवाम् अकरोत्।

(iii) महात्मा गाँधेः प्रेरणयासः भारतीय स्वतन्त्रता आन्दोलने भागं गृहीतवान्।

(v) कारागारे निवसन् सः बहुप्रेरणादायिनी पुस्तकानि विरचितवान्।

(i) सः सर्वदा स्वदेशस्यैव वस्त्राणां वस्तूनां च उपयोगं कृतवान्।

(vi) मरणासन्नं स्वपुत्रं अपि विहाय जलपीडितानाम् सेवार्थम् अगच्छत्।

(iv) गोपबन्धुः 'समाजः' इति दैनिकपत्रस्य प्रतिष्ठाता अपि आसीत्।

*** अधोलिखितशब्दानाम् अर्थान् विलिख्य वाक्येषु प्रयोगं कुरुत।** **[10]**

80. नष्टानि - ____________

**उत्तर :** नष्टानि - नष्ट हो गये
वाक्य - भयंकरेण जलप्लावेन अनेकानाम् जनानाम् गृहाणि नष्टानि।

81. अकुण्ठम् - ____________

**उत्तर :** अकुण्ठम् - आग्रहपूर्वक
वाक्य - गोपबन्धुः जलप्लाव पीडितानाम् अकुण्ठम् सेवां अकरोत्।

82. अनाहारेण - ____________

**उत्तर :** अनाहारेण - भोजन न करने से
वाक्य -आपदाग्रस्ताः जनाः अनाहारेण अत्यधिकं कष्टं असहन्।

83. दौर्लभ्यम् - ____________

**उत्तर :** दौर्लभ्यम् - कष्ट से प्राप्त किया
वाक्य - परिश्रमेण विना भोजनग्रहणम् सर्वदा दौर्लभ्यम्।

84. बुभुक्षितः - ____________

**उत्तर :** बुभुक्षितः - भूखा
वाक्य - अनाहारेण विना सर्वेऽपि बुभुक्षितः भवन्ति।

85. समादृतः - ____________

**उत्तर :** समादृतः - सम्मानित
वाक्य - गोपबन्धोः निःस्वार्थानि कार्याणि तम् समादृतम् कृतम्।

86. अगुञ्जत - ____________

**उत्तर :** अगुञ्जत - गूँजा
वाक्य - गोपबन्धोः कर्णयोः कश्चन करुणा स्वरः अगुञ्जत।

87. करुणध्वनिः - ____________

**उत्तर :** करुणध्वनिः - करुणायुक्त ध्वनि

वाक्य - परिवेषितभोजनम् कृतैव गोपबन्धुः कश्चिद् करुणध्वनिम् अश्रावयत्।

88. परिवेषितम् - ____________

**उत्तर :** परिवेषितम् - भोजन परोसा गया

वाक्य - आचार्य हरिहरेण अतिथिभ्यः सुस्वादूनि व्यञ्जनानि परिवेषितानि।

89. नदीस्रोतसा - ____________

**उत्तर :** नदीस्रोतसा - नदी के प्रभाव से

वाक्य - बहवः पशवोऽपि नदीस्रोतसा प्रवाहिताः मृताश्च।

*** अधोलिखित गद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[42]**

90. असौ महान् समाजसेवकः आसीत् गोपबन्धुदासः। असौ सत्यवादि-वनविद्यालयस्य अध्यापकः, प्रसिद्धेषु पञ्चमित्रेषु अन्यतमः स्वतन्त्रतासङ्ग्रामी चासीत्। ओडिशाराज्यस्य पुरीजनपदस्य साक्षीगोपालसमीपे सुआण्डो-ग्रामे जन्म लब्धवान्। अध्ययनकालादेव स दरिद्राणां रोगिणां च सेवामकरोत्। सत्यवादि-वनविद्यालये स छात्रान् निःशुल्कम् अपाठयत्। निरक्षरतादूरीकरणाय सः सततं यतते स्म। कार्पासवस्त्रनिर्माणाय सः स्वयमेव सूत्रप्रस्तुतिमकरोत्। जन्मभूमेः दुर्दशामवलोक्य स सर्वदा चिन्ताकुलो भवति स्म। महात्मगान्धेः प्रेरणया भारतीयस्वतन्त्रतान्दोलने गोपबन्धुः भागं गृहीतवान्। सः वर्षद्वयं यावत् कारावासं प्राप्तवान्।

I. एकपदेन उत्तरत -

(i) कः एकः महान् समाजसेवकः आसीत्?

(ii) गोपबन्धुः केषु अन्यतमः स्वतन्त्रता संग्रामी आसीत्?

II. पूर्णवाक्येन उत्तरत -

गोपबन्धुः जन्म कुत्र लब्धवान्?

III. निर्देशानुसारम् उत्तरत -

(i) ____________ सः दरिद्राणां रोगिणां च सेवामकरोत् । (प्रदत्तेषु विकल्पेषु उचितं शब्दम् चित्वा रिक्तस्थान् पूरयत )

(अ) बाल्यकालादेव (ब) युवावस्थायाः

(स) अध्ययनकालादेव (द) सर्वेऽपि

(ii) कानि निर्माणाय गोपबन्धुः स्वयमेव सूत्रप्रस्तुतिमकरोत्?

(अ) औषधिनिर्माणाय (ब) कर्पासवस्त्रनिर्माणाय

(स) भोजननिर्माणाय (द) कोऽपि न

(iii) कस्य प्रेरणया गोपबन्धुः भारतीय स्वतंत्रता-आन्दोलने भागं गृहीतवान्?

(अ) आचार्य हरिहरस्य (ब) महात्मगान्धेः

(स) स्वस्य (द) सर्वेऽपि

**उत्तर :** I. (i) गोपबन्धुः

(ii) पंचमित्रेषु

II. गोपबन्धुः ओडिशा राज्यस्य पुरी जनपदस्य साक्षीगोपाल समीपे सुआण्डो-ग्रामे जन्म लब्धवान्।

III. (i) (स) अध्ययनकालादेव

(ii) (ब) कर्पासवस्त्रनिर्माणाय

(iii) (ब) महात्मगान्धेः।

91. एकदा आचार्यहरिहरदासः सत्यवादि-वनविद्यालयस्य सर्वान् अध्यापकान् भोजनाय आमन्त्रितवान्। आमन्त्रिताः सर्वे अतिथयः हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः। बहूनि सुस्वादूनि व्यञ्जनानि कदलीपत्रेषु परिवेषितानि।

हसन् गोपबन्धुरवदत् - अरे!
भोजनस्यातिदौर्लभ्यं जीवनाय सुखप्रदम्।
तदर्थं भोजनं कुर्याः मा शरीरे दयां कुरु॥
एतच्छ्रुत्वा सर्वे उच्चैः हसितवन्तः । तदानीमेव बहिः कश्चन करुणध्वनिः गोपबन्धोः कर्णयोः अगुञ्जत् -

I. एकपदेन उत्तरत -
(i) कः सर्वान् अध्यापकान् भोजनाय आमन्त्रितवान्?
(ii) गोपबन्धोः कर्णयोः किम् अगुञ्जत्?

II. पूर्णवाक्येन उत्तरत -
आमन्त्रिताः अतिथयः कुत्र उपविष्टवन्तः?

III. निर्देशानुसारम् उत्तरत -
(i) व्यञ्जनानि कीदृशानि परिवेषितानि?
(अ) कटूनि (ब) मिष्टानि (स) अम्लानि (द) सुस्वादूनि
(ii) किम् दौर्लभ्यम् विद्यते?
(अ) भोजनम् (ब) फलम् (स) मिष्टान्नम् (द) सर्वेऽपि
(iii) "सर्वे उच्चैः हसितवन्तः" इति वाक्ये क्रियापदं?
(अ) सर्वे (ब) उच्चै (स) हसितवन्तः (द) कोऽपि न

**उत्तर :** I. (i) आचार्यः हरिहरदासः
(ii) करुणध्वनि
II. आमन्त्रिताः अतिथयः हस्तपादं क्षालयित्वा आसने उपविष्टवन्तः।
III. (i) (द) सुस्वादूनि
(ii) (अ) भोजनम्
(iii) (स) हसितवन्त

92. असौ सत्यवादि-वनविद्यालयस्य, दरिद्रनारायणसेवा-सङ्घस्य, सत्यवादि-मुद्रणालयस्य, समाजः इति दैनिक-वार्तापत्रस्य च प्रतिष्ठाता आसीत्। समाजः इति दिनपत्रिका शताधिकवर्षेभ्यः अधुनापि प्रतिदिनं प्रकाश्यते। समाजसेवायै देशसेवायै च तस्य असीमं त्यागमनुभवन् वैज्ञानिकः आचार्यः प्रफुल्लचन्द्ररायः गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।
उत्कलमणिरित्याख्यः प्रसिद्धो लोकसेवकः।
प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महामनाः॥

I. एकपदेन उत्तरत -
(i) गोपबन्धुः कस्य प्रतिष्ठाता आसीत्?
(ii) कः गोपबन्धुम् उत्कल मणिः उपाधिना सम्मानितवान्?

II. पूर्णवाक्येन उत्तरत -
कः दिनपत्रिका अधुनाऽपि प्रतिदिनं प्रकाश्यते?

III. निर्देशानुसारम् उत्तरत -
(i) 'समाजः' दिन पत्रिका केभ्यः वर्षेभ्यः अधुना अपि प्रतिदिनं प्रकाश्यते?
(अ) दशाधिकेभ्यः (ब) पंचाशताधिकेभ्यः (स) शताधिकेभ्यः (द) पंचशताधिकेभ्यः
(ii) गोपबन्धुः केन उत्कलमणिः उपाधिना सम्मानिताः?
(अ) शिक्षकेन (ब) आचार्य हरिहरेण (स) गोपबन्धुना (द) प्रफुल्लचन्द्ररायेण
(iii) गोपबन्धुः कस्मै असीमम् त्यागं अकरोत्?
(अ) देशसेवायै (ब) स्वस्य सेवायै (स) स्वपुत्रस्य सेवायै (द) कोऽपि न

**उत्तर :** I. (i) 'समाजः' दैनिक वार्तापत्रस्य
(ii) प्रफुल्लचन्द्ररायः
II. 'समाजः' इति दिनपत्रिका शताधिक वर्षेभ्यः अधुना अपि प्रतिदिनं प्रकाश्यते।
III. (i) (स) शताधिकेभ्यः
(ii) (द) प्रफुल्लचन्द्ररायेण
(iii) (अ) देशसेवायै।

93. स्वदेशभूमौ मम लीयतां तनुः, स्वदेशलोकास्तदनु प्रयान्तु नु।
स्वराज्यमार्गे यदि गर्तमालिका, ममास्थिमांसैः परिपूरितास्तु सा॥
I. एकपदेन उत्तरत -
(i) स्वदेशभूमौ गोपबन्धोः कः लीयताम्?
(ii) स्वराज्यमार्गे काः सन्ति?
II. पूर्णवाक्येन उत्तरत -
गर्तमालिका कैः परिपूर्णाः भवतु?
III. निर्देशानुसारम् उत्तरत -
(i) देशवासिनः कम् अनुसरणं कुर्वन्तु?
(अ) गोपबन्धुम् (ब) आचार्य हरिहरम्
(स) गोपबन्धोः तनुजम् (द) सर्वेऽपि
(ii) 'गर्ताः' शब्दस्य अर्थम् किम्?
(अ) कुण्डाः (ब) गर्तिकाः (स) गह्वराः (द) सर्वेऽपि
(iii) कस्य अस्थिमांसैः गर्ताः पूरिपूर्णाः भवन्तु?
(अ) आचार्य हरिहरस्य (ब) शिक्षकस्य (स) मातृभूमोः (द) गोपबन्धोः

**उत्तर :** I. (i) तनुः
(ii) गर्ताः
II. गर्तमालिका गोपबन्धोः अस्थिभिः मांसैः च पूरिपूर्ण भवतु।
III. (i) (अ) गोपबन्धुम्
(ii) (द) सर्वेऽपि
(iii) (द) गोपबन्धोः।

94. "मातः, मातः! बुभुक्षितोऽस्मि, कृपया किञ्चित् भोजनं देहि। दिनत्रयात् किमपि न भुक्तम्। भोजनं देहि मातः! भोजनं देहि। आँ आँ ..." इति क्रन्दनध्वनिं श्रुत्वैव दयाविगलितहृदयः गोपबन्धुः अश्रुपूर्णनयनोऽभवत्। किमपि अविचिन्त्य झटिति स्वस्मै परिवेषितं भोजनं हस्ते गृहीत्वा बहिरागतवान्। भिक्षुकञ्च तद्भोजितवान्।
I. एकपदेन उत्तरत -
(i) दयाविगलितहृदयः कः अस्ति?
(ii) भिक्षुकः किम् अयाचत्?
II. पूर्णवाक्येन उत्तरत -
किम् श्रुत्वा दीनबन्धुः अश्रुपूर्ण नयनोऽभवत्?
III. निर्देशानुसारम् उत्तरत -
(i) भिक्षुकः बहिः किम् अकरोत्?
(अ) जलम् अयाचत् (ब) वस्त्रम् अयाचत्
(स) भोजनम् अयाचत् (द) गृहे स्थानम् अयाचत्
(ii) कः स्वस्मै परिवेषितम् भोजनम् भिक्षुकं भोजितवान्?

(अ) आचार्य हरिहरदासः (ब) गोपबन्धुः
(स) अन्येषाः आमन्त्रिताः (द) सर्वेऽपि
(iii) “किञ्चित् भोजनम् देहि। दिनत्रयात् किमपि न भुक्तम्।" कः अवदत्?
(अ) गोपबन्धुः (ब) शिक्षकः (स) आचार्यहरिहरदासः (द) भिक्षुकः

**उत्तर :** I. (i) गोपबन्धुः
(ii) भोजनम्
II. भिक्षुकस्य क्रन्दनध्वनिं श्रुत्वा गोपबन्धुः अश्रुपूर्णनयनोऽभवत्।
III. (i) (स) भोजनम् अयाचत्
(ii) (ब) गोपबन्धुः
(iii) (द) भिक्षुकः

95. कारागारेनिवसन्सः 'बन्दीर आत्मकथा', 'कारा-कविता', 'धर्मपद', 'गो-माहात्म्य', 'नचिकेता-उपाख्यान' इत्यादीनि बहुप्रेरणादायीनि पुस्तकानि ओडिआभाषया विरचितवान्। सर्वदा स्वदेशस्यैव वस्त्राणां वस्तूनां च उपयोगं कृतवान्। मरणासन्नं स्वपुत्रमपि विहाय जलप्लावपीडितान् भारतमातुः सहस्रशः पुत्रान् उद्धर्तुं गृहात् बहिः निर्गतः समाजमसेवत च। देशसेवातत्परस्य गोपबन्धुवर्यस्य प्रसिद्धं प्रेरणादायकं वचनमधुनापि जनमानसेषु राष्ट्रभक्तिं जागरयति।
I. एकपदेन उत्तरत -
(i) गोपबन्धुः कारागारे कीदृशानि पुस्तकानि विरचितवान्?
(ii) गोपबन्धोः कीदृशं वचनम् अधुना अपि राष्ट्रभक्तिं जागरयति?
II. पूर्णवाक्येन उत्तरत -
कम् विहाय गोपबन्धुः जलप्लावित-पीडितान् उद्धर्तुम् गृहात् बहिः निर्गतः?
III. निर्देशानुसारम् उत्तरत -
(i) कारागारे गोपबन्धुः कया भाषया पुस्तकानि विरचितवान्?
(अ) बांग्लया (ब) आंगलेन (स) संस्कृतेन (द) ओडिया
(ii) गोपबन्धुः सर्वदा कस्यैव वस्त्राणाम् उपयोगं कृतवान्?
(अ) विदेशस्यैव (ब) स्वदेशस्यैव (स) बांग्लादेशस्यैव (द) कोऽपि न
(iii) कारागारे निवसन् गोपबन्धुः किम करोत्?
(अ) पुस्तकानि अलिखत् (ब) वस्त्राणाम् निर्माणं अकरोत्
(स) जलप्लावपीडितान् असेवत् (द) सर्वेऽपि

**उत्तर :** I. (i) प्रेरणादायिनी
(ii) प्रेरणादायकम्
II. मरणासन्नम् स्वपुत्रम् विहाय गोपबन्धुः जलप्लावपीडितान् उद्धर्तुम् गृहात् बहिः निर्गतः।
III. (i) (द) ओडिया
(ii) (ब) स्वदेशस्यैव
(iii) (अ) पुस्तकानि अलिखत्।

----- -----